संजय उवाच ।

sañjaya uvāca |

इत्यर्जुनं वासुदेवस्तथोक्त्वा

स्वकं रूपं दर्शयामास भूयः ।

आश्वासयामास च भीतमेनं

भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ११.५० ॥

ityarjunaṁ vāsudevastathoktvā
svakaṁ rūpaṁ darśayāmāsa bhūyaḥ |
āśvāsayāmāsa ca bhītamenaṁ
bhūtvā punaḥ saumyavapurmahātmā || 11.50||

अर्जुन उवाच ।

arjuna uvāca |

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।

इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ११.५१ ॥

dṛṣṭvedaṁ mānuṣaṁ rūpaṁ tava saumyaṁ janārdana |
idānīmasmi saṁvṛttaḥ sacetāḥ prakṛtiṁ gataḥ || 11.51||

श्रीभगवानुवाच ।

śrībhagavānuvāca |

सुदुर्दर्शमिदं रूपं दृष्ट्वानसि यन्मम ।

देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ११.५२ ॥

sudurdarśamidaṁ rūpaṁ dṛṣṭvānasi yanmama |
devā apyasya rūpasya nityaṁ darśanakāṅkśiṇaḥ || 11.52||

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।

शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ११.५३ ॥

nāhaṁ vedairna tapasā na dānena na cejyayā |
śakya evaṁvidho draṣṭuṁ dṛṣṭavānasi māṁ yathā || 11.53||

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।

ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परंतप ॥ ११.५४ ॥

bhaktyā tvananyayā śakya ahamevaṁvidho'rjuna |
jñātuṁ draṣṭuṁ ca tatvena praveṣṭuṁ ca parantapa || 11.54||

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।

निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ११.५५ ॥

matkarmakṛnmatparamo madbhaktaḥ saṅgavarjitaḥ |
nirvairaḥ sarvabhūteṣu yaḥ sa māmeti pāṇḍava || 11.55||